सर्व्वान् लोकान् विचरते द्वितीय इव भास्करः ।
अष्टमे राजसूयस्य पारणे लभते फलम् ॥
चन्द्रोदयनिभं रम्यं विमानमधिरोहति ।
चन्द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ॥
सेव्यमानो वरस्त्रीणां चन्द्रात् कान्ततरैर्म्मुखैः ।
मेखलानां निनादेन नूपुराणाञ्च निस्वनैः ॥
अङ्के परमनारीणां सुखसुप्तो विबुध्यते ।
नवमे क्रतुराजस्य वाजिमेधस्य भारत ! ॥
काञ्चनस्तम्भनिर्य्यूहं वैदूर्य्यकृतवेदिकम् ।
जाम्बूनदमयैर्दिव्यैर्गवाक्षैः सर्व्वतो वृतम् ॥
सेवितं चाप्सरःसङ्घैर्गन्धर्व्वैर्दिवि चारिभिः ।
विमानं समधिष्ठाय श्रिया परमया ज्वलन् ॥
दिव्यमाल्याम्बरधरो दिव्यचन्दनरूषितः ।
मोदते दैवतैः सार्द्धं दिवि देव इवापरः ॥
दशमं पारणं प्राप्य द्विजातीनभिवन्द्य च ।
किङ्किणीजालनिर्घोषं पताकाध्वजशोभितम् ॥
वसुदेविकसंकाशं वैदूर्य्यमणितोरणम् ।
हेमजालपरिक्षिप्तं प्रवालवड़भीमुखम् ॥
गन्धर्व्वैर्गीतकुशलैरप्सरोभिश्च शोभितम् ।
विमानं सुकृतावासं सुखेनैवोपपद्यते ॥
मुकुटेनार्कवर्णेन जाम्बूनदविभूषिणा ।
दिव्यचन्दनदिग्धाङ्गो दिव्यमाल्यविभूषितः ।
दिव्यान् लोकान् विचरति दिव्यैर्भोगैः समन्वितः ।
विबुधानां प्रसादेन श्रिया परमया युतः ॥
अथ वर्षगणानेवं स्वर्गलोके महीयते ॥
अथ गन्धर्व्वसहितः सहस्राण्येकविंशतिम् ।
पुरन्दरपुरे रम्ये शक्रेण सह मोदते ॥
दिव्ययानविमानेषु लोकेषु विविधेषु च ।
दिव्यनारीगणाकीर्णो निवसत्यमरो यथा ॥
ततः सूर्य्यस्य भवने चन्द्रस्य भवने तथा ।
शिवस्य भवने राजन् ! विष्णोर्याति सलोकताम् ॥
एवमेतन्महाराज ! नात्र कार्य्या विचारणा ।
श्रद्दधानेन वै भाव्यमेवमाह गुरुर्मम ॥ * ॥
लेखकस्य तु दातव्यं मनसा यद्यदिच्छति ।
हस्त्यश्वरथयानानि वाहनञ्च विशेषतः ॥
कटकं कुण्डलञ्चैव ब्रह्मसूत्रं तथापरम् ।
वस्त्रञ्चैव विचित्रञ्च गन्धञ्चैव विशेषतः ।
देववत् पूजयेत्तन्तु विष्णुलोकमवाप्नुयात् ॥ * ॥
अतः परं प्रवक्ष्यामि यानि देयानि भारते ।
वाच्यमाने तु विप्रेभ्यो राजन् ! पर्व्वणि पर्व्वणि ॥
जातिं देशञ्च सत्त्वञ्च माहात्म्यं भरतर्षभ ! ।
धर्म्मवृत्तिञ्च विज्ञाय क्षत्रियाणां नराधिप ! ॥
स्वस्तिवाच्य द्विजानादौ ततः कार्य्यं प्रवर्त्तते ।
समाप्ते पर्व्वणि ततः स्वशक्त्या पूजयेत् द्विजान् ॥
आदौ तु वाचकन्तत्र वस्त्रगन्धसमन्वितम् ।
विधिवद्भोजयेद्राजन् ! मधु पायसमुत्तमम् ॥
ततो मूलफलप्रायं पायसं मधुसर्पिषा ।
आस्तीके भोजयेद्राजन् ! दद्याच्चैव गुड़ौदनम् ॥
अपूपैश्चैव पूपैश्च मोदकैश्च समन्वितम् ।
सभापर्व्वणि राजेन्द्र ! हविष्यं भोजयेद् द्विजान् ॥
आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
अरणीपर्व्व चासाद्य जलकुम्भान् प्रदापयेत् ॥
तर्पणानि च मुख्यानि रम्यमूलफलानि च ॥
सर्व्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ।
विराटपर्व्वणि तथा वासांसि विविधानि च ॥
उद्योगे भरतश्रेष्ठ ! सर्व्वकामगुणान्वितम् ।
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् ॥
भीष्मपर्व्वणि राजेन्द्र ! दत्त्वा यानमनुत्तमम् ।
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ॥
द्रोणपर्व्वणि विप्रेभ्यो भोजनं परमार्च्चितम् ।
शराश्च देया राजेन्द्र ! चापान्यसिवरास्तथा ॥
कर्णपर्व्वण्यपि तथा भोजनं सार्व्वकामिकम् ।
विप्रेभ्यः संस्कृतं सम्यक् दद्यात् संयतमानसः ॥
शल्यपर्व्वणि राजेन्द्र ! मोदकैः सगुड़ौदनैः ।
अपूपैस्तर्पणैश्चैव सर्व्वमन्नं प्रदापयेत् ॥
गदापर्व्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥
स्त्रीपर्व्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्ताच्च ऐषीके दापयेत् पुनः ॥
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
शान्तिपर्व्वण्यपि तथा हविष्यं भोजयेद् द्विजान् ॥
आश्वमेधिकमासाद्य भोजनं सार्व्वकामिकम् ।
तथाश्रमनिवासे तु हविष्यम्भोजयेत् द्विजान् ॥
मौषले सार्व्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत् सर्व्वकामगुणान्वितम् ॥
स्वर्गपर्व्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंशे पर्व्वणि च पायसं तत्र भोजयेत् ॥
पारणे पारणे राजन् ! यथावद्भरतर्षभ ! ।
समाप्य सर्व्वाः प्रयतः संहिताः शास्त्रकोविदः ॥ * ॥
शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ।
शुक्लाम्बरधरः स्रग्वी शुचिर्भूत्वा स्वलङ्कृतः ॥
अर्च्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
संहितापुस्तकान् राजन् ! प्रयतः सुसमाहितः ॥
भक्ष्यैर्माल्यैश्च पेयैश्च कामैश्च विविधैः शुभैः ।
हिरण्यञ्च सुवर्णञ्च दक्षिणामथ दापयेत् ॥
देवताः कीर्त्तयेत् सर्व्वा नरनारायणौ तथा ।
ततो गन्धैश्च माल्यैश्च स्वलंकृत्य द्विजोत्तमान् ॥
तर्पयेद्विविधैः कामैर्दानैश्चोच्चावचैस्तथा ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
प्राप्नुयाच्च क्रतुफलं तथा पर्व्वणि पर्व्वणि ।
वाचको भरतश्रेष्ठ ! व्यक्ताक्षरपदस्वरः ॥
भविष्यं श्रावयेद्विद्वान् भारतं भरतर्षभ ! ।
भुक्तवत्सु द्विजेन्द्रेषु यथावत् संप्रदापयेत् ॥
वाचकं भरतश्रेष्ठ ! भोजयित्वा स्वलङ्कृतम् ।
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्व्वदेवताः । * ।
ततो हि वरणं कार्य्यं द्विजानां भरतर्षभ ! ॥
सर्व्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः ।
इत्येष विधिरुद्दिष्टो मया ते द्विपदां वर ! ॥
श्रद्दधानेन वै भाव्यं यन्मां त्वं परिपृच्छसि ।
भारतश्रवणाद्राजा पारणे च नृपोत्तम ! ॥
सदा यत्नवता भाव्यं श्रेयस्तु परमिच्छता ॥ * ॥
भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥
भारतं परमं पुण्यं भारते विविधाः कथाः ।
भारतं सेव्यते देवैर्भारतं परमं पदम् ॥
भारतं सर्व्वशास्त्राणामुत्तमं भरतर्षभ ! ।
भारतात् प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि ते ॥
महाभारतमाख्यानं क्षितिं गाञ्च सरस्वतीम् ।
ब्राह्मणान् केशवञ्चैव कीर्त्तयन्नावसीदति ॥
वेदे रामायणे पुण्ये भारते भरतर्षभ ! ।
आदौ चान्ते च मध्ये च हरिः सर्व्वत्र गीयते ॥
यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः ।
तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता ॥
एतत् पवित्रं परममेतद्धर्म्मनिदर्शनम् ।
एतत् सर्व्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ॥”
इति महाभारते हरिवंशे सर्व्वपर्व्वानुकीर्त्तनम् ॥ * ॥ त्रिषष्टिवर्णसंयुक्तमित्यत्र त्रिषष्टिवर्णाः । अ इ उ ऋ ऌ इति ह्रस्वपञ्चकम् । आ ई ऊ ॠ ॡ इति दीर्घपञ्चकम् । आ ई ऊ ॠ ॡ इति प्लुतपञ्चकम् । ए ओ ऐ औ च दीर्घाः । प्लुतत्वेनापरचतुष्टयम् । अं अः क+ प५ इति चत्वारः । ॠ ॡ इति अपसंज्ञकौ द्वौ । अनुनासिकश्चैकः । तथा कादिमावसानाः पञ्चविंशतिवर्णाः । अन्तःस्थाश्चत्वारः । उष्मचतुष्टयमिति त्रिषष्टिः । इति ॥ * ॥ वर्णानां किलाष्टौ स्थानानि भवन्ति तानि यथा,—
“उरः कण्ठः शिरस्तालु जिह्वादन्तौष्ठनासिकाः ।
अष्टौ स्थानानि वर्णानां ये विदुस्ते हि पाठकाः ॥” * ॥
पारणं यथा,—
“भारतं शतपर्व्वोक्तं मुनिना तत्त्वदर्शिना ।
पर्व्वभिर्दशभिश्चैषां पर्व्वणां पारणं स्मृतम् ॥”
इति विक्रमादित्यः ॥
“द्यूतान्तं प्रथमं प्रोक्तं द्वितीयं वनवासिकम् ।
उद्योगान्तं तृतीयन्तु भीष्मान्तञ्च तुरीयकम् ॥
पञ्चमं द्रोणपर्व्वान्तं कर्णान्तं पारणं ततः ।
विशोकान्तं सप्तमन्तु शान्तिपर्व्वान्तमष्टमम् ॥
नवमं स्वर्गपर्व्वान्तमाश्चर्य्यान्तमतः परम् ॥”
इति च भारतटीकायां अर्ज्जुनमिश्रः ॥
(अन्यत्सर्व्वं भारतशब्दे द्रष्टव्यम् ॥)

महाभीता, स्त्री, (महत्यधिका भीतेव ।) लज्जालुवृक्षः । यथा, शब्दचन्द्रिकायाम् ।
“स्पर्शलज्जा महाभीता वशिनी च महौषधिः ॥”
(महानतिशयो भीतः ।) अतिशयभययुक्ते, त्रि ॥

महाभीमः, पुं, (महानतिशयो भीमः । भीषणाकृतित्वात् शिवांशसम्भूतत्वाच्च तथात्वम् ।) शान्तनुराजः । इति जटाधरः ॥ भृङ्गिनामकशिवद्वारपालः । इति त्रिकाण्डशेषः ॥ अतिशयभयानके, त्रि ॥